श्री हरिहरपुत्र अष्टोत्तर शतनामस्तोत्रं

अस्य श्रीहरिहरपुत्राष्टोत्तरशतनामस्तोत्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छंदः ।
श्रीहरिहरपुत्रो देवता । ह्रीं बीजं ।श्रीं शक्तिः । क्लीं कीलकं ।
श्रीहरिहरपुत्रप्रीत्यर्थे जपे विनियोगः ॥

ह्रीं इत्यादिभिः षडंगन्यासः ॥

ध्यानं ॥

त्रिगुणितमणिपद्मं वज्रमाणिक्यदंडं
सितसुमशरपाशमिक्षुकोदंडकांडं ।
??घृतमधुपात्रं बिभ्रतं हस्तपद्मैः
हरिहरसुतमीडे चक्रमंत्रात्ममूर्तिं ॥

ॐ । महाशास्ता विश्वशास्ता लोकशास्ता तथैव च ।
धर्मशास्ता वेदशास्ता कालशस्ता गजाधिपः ॥1॥

गजारूढो गणाध्यक्षो व्याघ्रारूढो महद्युतिः ।
गोप्तागीर्वाणसंसेव्यो गतातंको गणाग्रणीः ॥2॥

ऋग्वेदरूपो नक्षत्रं चंद्ररूपो बलाहकः ।
दूर्वाश्यामो महारूपः क्रूरदृष्टिरनामयः ॥3॥

त्रिनेत्र उत्पलकरः कालहंता नराधिपः ।
खंडेंदुमौळितनयः कल्हारकुसुमप्रियः ॥4॥

मदनो माधवसुतो मंदारकुसुमर्चितः ।
महाबलो महोत्साहो महापापविनाशनः ॥5॥

महाशूरो महाधीरो महासर्पविभूषणः ।
असिहस्तः शरधरो हालाहलधरात्मजः ॥6॥

अर्जुनेशोऽग्निनयनश्चानंगमदनातुरः ।
दुष्टग्रहाधिपः श्रीदः शिष्टरक्षणदीक्षितः ॥7॥

कस्तूरीतिलको राजशेखरो राजसत्तमः ।
राजराजार्चितो विष्णुपुत्रो वनजनाधिपः ॥8॥

वर्चस्करोवररुचिर्वरदो वायुवाहनः ।
वज्रकायः खड्गपाणिर्वज्रहस्तो बलोद्धतः ॥9॥

त्रिलोकज्ञश्चातिबलः पुष्कलो वृत्तपावनः ।
पूर्णाधवः पुष्कलेशः पाशहस्तो भयापहः ॥10॥

फट्काररूपः पापघ्नः पाषंडरुधिराशनः ।
पंचपांडवसंत्राता परपंचाक्षराश्रितः ॥11॥

पंचवक्त्रसुतः पूज्यः पंडितः परमेश्वरः ।
भवतापप्रशमनो भक्ताभीष्टप्रदायकः ॥12॥

कविः कवीनामधिपः कृपाळुः क्लेशनाशनः ।
समोऽरूपश्च सेनानिर्भक्तसंपत्प्रदायकः ॥13॥

व्याघ्रचर्मधरः शूली कपाली वेणुवादनः ।
कंबुकंठः कलरवः किरीटादिविभूषणः ॥14॥

धूर्जटिर्वीरनिलयो वीरो वीरेंदुवंदितः ।
विश्वरूपो वृषपतिर्विविधार्थफलप्रदः ॥15॥

दीर्घनासो महाबाहुश्चतुर्बाहुर्जटाधरः ।
सनकादिमुनिश्रेष्ठस्तुत्यो हरिहरात्मजः ॥16॥

इति श्री हरिहरपुत्राष्टोत्तरशतनामस्तोत्रं संपूर्णं ॥